

[illegible handwritten note] पार्वती पत[illegible] ॥०

[illegible marginal note]

ॐ स्वस्ति श्री गणेशाय नमः ॥

सूत उवाच ॥ ॥ अथातः संप्रवक्ष्या मि शुद्धं कैवल्यमुक्तिदं ॥ अनुग्र हान्महेशस्य भवदुःखस्य भेषजं ॥ १॥ न कर्म्मणामनुष्ठानैर्न दानै स्तपसापि वा ॥ कैवल्यं लभते मर्त्यः किंतु ज्ञानेन केवलं ॥ २॥ रामाय द ण्डकारण्ये पार्वतीपतिना पुरा ॥ या प्रोक्ता शिवगीताख्या गुह्याद्गु ह्यतमापि सा ॥ ३॥ यस्याः स्मरण मात्रेण नृणां मुक्तिर्ध्रुवा भवेत् ॥ पुरा सनत्कुमाराय स्कंदेनाभिहि

शीवगीता का पेट मां [illegible] वने
[illegible]

माहिमा॥४॥ सनत्कुमारः ओवाच यथा
मायं मुनिसत्तमः॥ महर्षपात्तिरे
णाग्रदत्तैबादरायणाः॥५॥ उक्तं तेन
हि कस्मैचिन्न दानव्यामिदं त्वया॥
सतपुत्रान्यथा देवाः शृण्वंति च त्र
पंति च॥६॥ श्रूयथस्नानमयाविप्रा
भगवन्बादरायणाः॥ भगवंस्देवत
सर्वाः किं शृण्वंति श्रापंति च॥७॥
तासां मासानां कार्तिकालानियं याव
पंति देवताः॥ पापासंयोथमास
ह्ययत्नाश्वं शृणु वत्स तत्त्व॥८॥ कि
माग्निहोत्रिणो विप्राः सान्ति ये

हरेर्पितः ॥ तएवसर्वफलदाः सु
राणांकामधेनवः ॥ ९ ॥ भक्ष्यभोज्यं
चपेयंच यद्दिष्टंसुपर्वणां ॥ अग्
नौहुतेनहविषातत्सर्वंलभ्यते
हिवि ॥ १० ॥ नान्यदस्तिसुरेशानामभि
ष्टसिद्धिप्रदंभुवि ॥ दोग्ध्रीधेनुर्य
थानीताद्दुःखदागृहमेधिनां ॥
११ ॥ तथैवज्ञानवान्विप्रोदेवानां
दुःखदोभवेत् ॥ धिग्द्वात्मनावि
प्रांतिप्रविष्टाविषयंसुराणां ॥ १२ ॥
यतोनजायतेभक्तिःशिवेकस्मा
पिदेहिनः ॥ तस्माद्विष्णौनैव

जायन्ते मूलपापिनः॥ ९३॥ यथा कथं चिद्‌ज्ञातापि मध्ये विघ्नघ्नते नृणाम्॥ आतं वापि चिरावज्ञा मे न विश्वासं भजन्मलं॥ ९४॥ कथयत्वं चुः यद्येवं देवताविघ्नमाचरंति न नृपतां॥ पौरुषं तत्र कस्यास्ति येन मुक्तिं भवंति॥ ९५॥ सत्यं मत्ताप्य जनबुद्धिनोपायोस्ति वा न वा॥ सूत उवाच कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते॥ ९६॥ इष्टापूर्तानि कर्माणि तेनाचरितमानवः॥ शि वार्पणधिया कामान्परित्यज्य

थाविधिः॥१७॥ अनुग्रहात्तेमर्त्यो
मोऽसुहृदो जायते नरः॥ ततो भीताः
पलायंते विघ्नं हित्वा सुरेश्वरः॥१८॥
आयुर्ते येन शुश्रूषाचरिते चंद्रमौ
लिनः॥ श्रावतो जायते ज्ञानं ज्ञान
देवाद्विमुच्यते॥१९॥ बहुनात्र किमु
क्तेन यस्य भक्तिः शिवे दृढा॥ महा
पापौघपापौघकोटिग्रस्तो विमु
च्यते॥२०॥ संसारबंधनात्तस्माद्दस्यः
कोवापिस्कंधीः॥ नियमाद्यस्तु
कुर्वीत भक्तिं वा द्रोहमेव च॥२१॥ त
स्यापि चेद्यसन्नोसौ फलं यच्छति
वांछितं॥ कुद्धं किंचित्समादाय प

शि॰ गी
॥ २ ॥

स्नंजलमेववा ॥ २४ ॥ योदद्याल्लियमे
नाश्रोतंस्येदद्याजगत्त्रयं ॥ नमस्कार
कोनियमात्नमस्कारप्रदक्षिणां
॥ २५ ॥ यः करोतिमहेशस्यतस्मैतुष्टो
भवेच्छिवः ॥ प्रदक्षिणायुतः कोपि
यः स्यात्तोषयेच्छिवं ॥ २६ ॥ गच्छन्न
मुपविष्टोवातस्याभीष्टंप्रयच्छति
चंदनंविल्वकाष्टस्यपुष्पाणिवन
जान्यपि ॥ २७ ॥ फलानितादृशान्ये
वयस्यप्रीतिकराणिवै ॥ दुःकरंन
स्यसेवायांकिमास्तिभुवनत्रये
॥ २८ ॥ वन्येषुयादृशीप्रीतिर्वर्त्तते
रमेशितुः ॥ उत्तमेष्वपिनान्येषु

दृशी गामभ्रेषु च ॥ २४ ॥ तत्र स्नात्वाद्द
शं देवं यः सेवेतान्म देवतां ॥ स हि भा
गीरथीतस्नात्वा कांसतेम गत्यु भ्रिको
२५ ॥ किं तु तस्यास्ति दुरितं कोटिजन्म
सुसंचितं ॥ यस्य अकाल्नाते मासाव
धौमो हांध चेतसः ॥ २६ ॥ न कालनि
यमो यत्र न देवोस्य सस्य कुलस्य च ॥ य
स्यापि चित्रं रमते तत्र ध्याने न केव
लं ॥ २७ ॥ स्वात्मलेनाशिवस्य वाशिव
सायुज्यमाप्नुयात् ॥ अतिस्लातर
युः श्री भूतेशां स्याधिपो पिथः ॥ २८ ॥
स तु राज्ञा हम स्तीति वादिनं हति
मान्वयं ॥ कर्तापि सर्वलोकानाम

क्षयैष्यत्यघानपि ॥ २२ ॥ शिवःशिवो
हमस्मीतिवादिनंयंचकंचन ॥ २३ ॥ आ
त्मनासहतादात्म्यभागिनंकुरुते
भृशं ॥ २४ ॥ धर्मार्थकाममोक्षाणांपा
रंयास्यथयेनवै ॥ मुनयस्तत्रवक्ष्या
मिव्रतंपाशुपताभिधं ॥ २५ ॥ कृत्वा
तुविरजांदीक्षांभूतिरुद्राक्षधारि
णः ॥ जपंतोवेदसाराख्यंशिवना
मसहस्रकं ॥ २६ ॥ संत्यज्यतेनम
र्त्यत्वंशैवींतनुमवाप्स्यथ ॥ ततः
प्रसन्नोभगवान्शंकरोलोक
शंकरः ॥ २७ ॥ भवतांदृश्यतामेत्य
कैवल्यंवःप्रदास्यति ॥ रामायद

ऽकारणेप्ययमगस्त्यःकुंभसंभवः॥ तत्सर्वं
वःप्रवक्ष्यामिकृत्स्नशोभक्तियोगतः॥
॥२८॥ इतिश्रीपद्मपुराणेशिवगीता
सूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेसूतऋषिसंवादेभक्तियोगोनामप्रथ
मोध्यायः॥१॥ ऋषयऊचुः॥ किम
र्थमागतोगस्त्योरामचंद्रस्यसन्नि
धिं॥ कथंवाविरजांदीक्षांकारया
मासराघवं॥१॥ ततःकिमाप्तवा
न्रामोफलंतद्वक्तुमर्हसि॥ सूत
उवाच॥ रावणेनयदासीतापहृता
जनकात्मजा॥२॥ तदावियोगदुः
खेनविलपन्नासराघवः॥ निर्नि
द्रोनिरहंकारोनिराहारोदिवानि

त्रि॰गी
॥२॥

त्रिं॥३॥मोक्षुमेवततःआगतास्मानु
ष्टोरघुनंदनः॥कृपामुत्पत्तिंज्ञा
त्वातस्यसान्निधिमागमत्॥४॥अथ
तंबोधयामाससंसारासारतांमुनिः
अष्टावक्र उवाच॥किंविषीदसिराजें
द्रकांनाकस्यापिवार्यतां॥५॥जडः
किंचिन्नजानासिदेहोयंपांचभौ
तिकः॥निर्लेपःपरिपूर्णश्चसाक्षी
त्वानंदविग्रहः॥६॥आत्मासंजाय
तेनैवम्रियतेनचदुःखभाक्॥सू
र्योसौसर्वलोकस्यचक्षुष्टेनयथा
स्थितः॥७॥तथापिचाक्षुषैर्दोषै
र्नकदाचिद्विलिप्यते॥सर्वभूतानां

रात्मापितद्वद्दुःखैर्नलिप्यते ॥ ८ ॥ दे
होपिमलपिंडोयंमुक्तिवीजोजडा
त्मकः ॥ दह्यतेवाह्निनाकाष्टैःश्विवा
यैर्भक्षितेपिवा ॥ ९ ॥ तथापिनैवजा
नातिविरहेतस्यकाव्यथा ॥ सुवर्ण
गौरीदूर्वाग्रादलश्यामलापिवा ॥
१ ॥ पीनोत्तुंगस्तनाभोगमध्यसू
क्ष्मविलग्नका ॥ रहस्थितंवजघ
नारक्तपादाधरोरुहा ॥ ११ ॥ एका
चंद्रमुखीविंबप्रतिबिंबरदच्छदा ॥
नीलेंदीवरनीकाशनयनद्वयशो
भिता ॥ १२ ॥ मत्तकोकिलसंलापा
मत्तद्विरदगामिनी ॥ कटाक्षैरनुगृ

ज्ञातिस्वापं चेषु च्छोत्रो मे: ॥१३॥ इन्द्रियो
मध्यते मूर्ध्नः स चपं चेषु च्छापितः ॥ त
स्माविवेकं वस्त्राभिः सृएगुष्वावहितो
नृप ॥१४॥ न च स्त्री न पुमानेष नैव
चायं नपुंसकः ॥ अमूर्तः पुरुषः पू
र्णो दृष्टा देही स जीवकः ॥१५॥ या त
न्वंगी मृदुर्बाला मलापरएंडजडाहि
का ॥ सा न पश्यति यत्किंचिन्न मृ
णोति न जिघ्रति ॥१६॥ चर्ममात्रं
तनुस्तस्या बुध्यास्पृक्ष्व एथव ॥
या प्राणादधिका सैव हंत तस्या घृ
णास्पद ॥१७॥ आयं ते यदि भूतिमो
देहिनः पांचभौतिकाः ॥ आत्मा य

घेकलत्तेष्वपरिपूर्णः सनातनः ॥१८॥
काकांतात्रकः कांतः सर्वएवसहो
दराः ॥ निर्मितायांगृहावल्यांतद
वच्छिन्नतांगतं ॥१९॥ नभसस्यांतु
दग्धायां नकाचित्क्षतिरुच्छ्रति ॥
तद्वदात्मापि देहेष्वपरिपूर्णः सना
तनः ॥२०॥ हन्यमानेषु तेष्वेव सत्व
यं नैव हन्यते ॥ हंताचेन्मन्यते हंतुं
हतश्चेन्मन्यते हतं ॥२१॥ तावुभौन
विजानीतो नायं हंति न हन्यते ॥ त
स्मान्मृत्यौ प्राप्तदुःखं न किंचिदस्यास्ति
कारणं ॥२२॥ स्वस्वरूपं विदित्वैवं दुः
खं संत्यक्त्वा सुखिभव ॥ श्री गु म उ वा च

मुने देहस्य नो दुःखं नैव चेयस्मात्म
नः ॥२४॥ सीतावियोगदुःखाग्निर्मां
भस्मीकुरुते कथं ॥ सम्भूयते योर्थः
सम्नास्तानित्वयेरितः ॥२५॥ जायतं त
थविश्वासः कथं मे मुनिपुंगव ॥ थ्यमो
स्ति कस्य वैभोक्तायेन अनुगतप्यते ॥ द्य
सुखस्य वापि दुःखस्य तद् हि मुनिम
त्तमः ॥ अगस्तिरुवाच ॥ दुर्ज्ञेया सा भवी
मायातयासंमोहितं जगत् ॥२६॥ मा
यां तु प्रकृतिं विद्धि मायिनं तु महेश्वरं
तस्यावयवभूतेन व्याप्तं सर्वमिदं ज
गत् ॥२७॥ सत्यज्ञानात्मकोऽनन्तो वि
भुरात्मा महेश्वरः ॥ तस्यैवांशो जीव

लोके आत्मा हृदये स्थितः॥२८॥ वि
स्फुलिंगयथावह्नेर्जायंते काष्ठयो
गतः॥ अनादिकर्मसंबद्धास्तद्वदं
शामहेशितु॥२९॥ अनादिवासना
युक्ताः क्षेत्रज्ञा इति ते स्मृताः॥ मनो
बुद्धिरहंकारश्चित्तं चेति चतुष्टयं॥३०॥
अंतःकरणमित्याहुस्तद्वतेयांतिविंब
ताः॥ जीवत्वं प्राप्नुयुः कर्मफलभो
क्तार एव ते॥३१॥ ततो वैषयिकं तेषां
सुखं वा दुःखमेव वा॥ त एव भुंजते
भोगायतनेस्मिन्शरीरके॥३२॥
स्थावरं जंगमं चेति द्विविधं वपुरुच्यते॥
स्थावरास्तस्य देहाः स्युः मस्मागु

श्रि·गी
॥९॥

स्खलनादयः ॥२२॥ सुंउआः स्वेदसा
न्तद्दुङ्गुलाइतिअंगमाः ॥ योनिम
न्येअपद्यंतेशरीरत्वायदेहिनः ॥२४॥
स्थाणुमन्येनुसंयांतियथाकर्मयथ
याश्रुतं ॥ सुखंदुःखंहंचेतिजीव
एषाभिमन्यते ॥२५ लिलैपापिपरंसो
तिर्मोहितःशंभुमायया ॥ कामक्रो
धस्तथालोभोमदोमात्सर्यमेवच
॥२६॥ मोहश्चैतारिषड्वर्गमिदंकारग
मंविदुः ॥ तैरेवबाध्यतेजीवःस्वप्रजा
गद्वस्थयोः ॥२७॥ सुषुप्तौतदभा
वाद्धजीवःशोकरतांगतः ॥ सर्वभ्रमा
ययास्पष्टःकारणंसुखदुःखयोः

॥३८॥ सुक्तौरजतवद्विश्वंमाययाह्स्य
मोहिवे॥ नतोविवेकज्ञानेनकोप्यत्रा
क्लिन्नदुःखभाक्॥३९॥ नतोविरमदुः
खात्वंकिमुधापरितप्यसे॥ श्रीराम
उवाच॥ मुनेसर्वमिदंसत्यंयत्स्वयाहगे
त्वयोदितं॥४०॥ तथापिनजहात्से
नस्थारब्धादृष्टमुल्बणं॥ यत्नंकुर्या
यथामथ्यंनष्टाविधमपीड्सं॥४१॥
तद्वत्प्रारब्धभोगोयंनजहातिवि
वेकिनं॥ ततःकिंबहुनोक्तेनप्रा
रब्धंसाक्षिवःस्मृतः॥४२॥ वाधते
मांदिवारात्रमहंकारोपिताहृशः॥
अत्यंतंपीडितोजीवःस्थूलदेहं

ता॰गी
॥२॥

विमुंचति ॥४३॥ तस्माज्जीवाम्नऐ
मत्यमुपायं श्रियमां हि जः ॥४४॥ इ
ति श्रीपद्मपुराणे शिवगौतासू
पनिषत्सु ब्रह्मविद्यायां योगशास्त्रे अ
गस्त्यराघवसंवादे वैराग्ययोगो ना
मद्वितीयोध्यायः ॥२॥ अगस्त्य उ
वाच ॥ भगवद्गीतावचः पुण्यं रामः
क्रोधादिपीडितः ॥ हितं नरोत्तमेते
तस्य मुमुक्षोः शिवभेषजं ॥१॥ मध्ये
समुद्रं यातासीत्सीता दैत्येन मत्प्रि
या ॥ कथं यास्यामि नरश्रेष्ठ साकेतं
तवसान्निधिं ॥२॥ वध्यंते देवताः
सर्वाः हारि मर्कटयूथपाः ॥ किंतु

चामरधारिणो यस्य संति सुरांगनाः ॥
३ ॥ भुंक्ते त्रिलोकीमखिलां यः शंभु
वरदर्पितः ॥ निष्कंटकं तस्य जयः क
थं तव भविष्यति ॥ ४ ॥ इंद्रजिन्नाम पु
त्रोयस्तस्यास्ति समरोद्धतः ॥ तस्याग्रे
संगरे देवाव कुबेरं पलायिताः ॥ ५ ॥
कुंभकर्णोनुजोभ्राता यस्यास्ति
समरोद्धतः ॥ अम्भोदिव्यास्त्र संयु
क्तश्चिरंजीवी विभीषणः ॥ ६ ॥ दु
र्गंतस्यास्ति लंकाख्यं दुर्जयं देवदा
नवैः ॥ चतुरंगबलं यस्य वर्त्तते को
टिसंख्यया ॥ ७ ॥ एकाकिनात्वया
जेयः सकथं नृपनंदन ॥ आकांक्ष

शि० गी
॥ ९॥

तेकरेधनुर्बाणंसंग्राममंसंयथा॥ ८॥ त
थात्वंकामंमोहंचजेयंतस्याभिभा
षसे॥ श्रीरामउवाच॥ सावित्रेयोहंमु
निश्रेष्ठभयांमेरक्षसाहता॥ यदि
तंनानिहन्म्यासुजीवनेमेस्तिकिं
फलं॥ अतस्तितत्संबोधेननमेकिं
चित्प्रयोजनं॥ ९॥ कामक्रोधादयः
सर्वेहंतव्यास्तेनुमम॥ अहंकारोपि
मेनित्यंजीवनंहंतुमुद्यतः॥ १०॥
हंतायांनिजंकांमायांचचतुरगाव
मतस्यच॥ यस्यतत्वंअभ्यासस्याम
लोकेपुरुषाधमः॥ ११॥ तस्मात्तं
स्यबधोपायंलंघयित्वांबुधिरले

ब्रूहि मे मुनिशार्दूल त्वत्तो नान्योस्ति
मे गुरुः ॥ १४ ॥ अगस्त्य उवाच ॥ एवं चे-
त्त्वं याहि पार्वतीपतिमव्ययं ॥ स चे-
त्प्रसन्नो भगवान्वांछितार्थं प्रदास्य-
ति ॥ १५ ॥ देवैरजेयः शक्राद्यैर्हरिणा
ब्रह्मणापि वा ॥ स ते वध्यः कथं वा स्तु शं-
करानुग्रहं विना ॥ १६ ॥ अतस्त्वां दी-
क्षयिष्यामि विरजामार्गमाश्रितः ॥
तेन मार्गेण भस्मेन दिग्धात्तेजोमयो
भव ॥ १७ ॥ येन हत्वा रणे शत्रून्सर्वान्का-
मानवाप्स्यसि ॥ भुक्त्वा भोगानलं चां-
ते शिवसायुज्यमाप्स्यसि ॥ १८ ॥ सूत
उवाच ॥ ततः प्रणम्य रामस्तं दंडव-

न्मुनिसत्तमं ॥ जातश्च दुःखनिर्मुक्तः अथ
हृष्टेनांतरात्मना ॥ ११ ॥ कृतार्थोहंमु
नेजातो वांछितार्थोस्म्यागतः ॥ पि
ता बुद्धिप्रसन्नस्त्वं यदि मे किं सुदु
र्लभं ॥ १२ ॥ अतस्त्वं विरजां दीक्षां ब्रू
हि मे मुनिसत्तम ॥ अगस्त्य उवा
च ॥ शुक्लपक्षे चतुर्दश्यामष्टम्यां वा
विशेषतः ॥ १३ ॥ एकादश्यां सोमवा
रे आर्द्रायां वा समारभेत् ॥ यं वाम
माहुर्यं रुद्रं यमग्निं परमेश्वरं ॥ १४ ॥
परात्परतरं चाहुः परात्परतरं शिवं ॥ ब्र
ह्मणो जनकं विष्णोर्वह्नेर्वायोः स
दाशिवं ॥ १५ ॥ ध्यात्वाग्निनावसथ्या

गिंत्रिस्रोतध्यवरणथकृष्ठथकृ ॥ पं
चभूतानिसंयम्यध्यात्वागुणैर्वि
धिंक्रमात् ॥ २४ ॥ मात्रपंचचतस्रश्च
त्रिमात्राद्विस्ततःपरं ॥ एकमात्रम
मात्रंहिद्वादशान्तंव्यवस्थितं ॥ २५ ॥
स्थित्वास्थाप्यामृतोभूत्वाव्रतंपा
शुपतंचरेत् ॥ २६ ॥ एतद्व्रतंपाशुपतंकरि
ष्यामिसमाहितः ॥ २७ ॥ प्रातरेवंतु
संकल्पनिधायाग्निंस्वशाखया ।
उपोषितःशुचिःस्नातःशुक्लांब
रधरःस्वयं ॥ २८ ॥ शुक्लयज्ञोपवी
तश्चशुक्लमाल्यानुलेपनः । जुहुया
द्विरजामंत्रैःप्राणापानादिभिस्त

शम्भो

तः॥२७॥ यन्नुवेकांतमेकाग्रः समि-
द्धंबरूस्थकं॥ आत्मन्यग्निंस-
मारोप्य यातिआग्नेतिमंत्रतः॥२८॥
भस्मादयाग्निरित्याद्यैर्विमृश्यांगा-
नि संस्पृशेत्॥ भस्मच्छन्नोद्विजो
विद्वान्महापातकसंभवैः॥२९॥ पा-
पैर्विमुच्यते सत्यं मुच्यते च न संशयः॥
वीर्यमग्नेर्यतो भस्म वीर्यवान् भस्म-
संयुतः॥३०॥ भस्मस्नानरतो विप्रो
भस्मशायी जितेंद्रियः॥ सर्वपाप-
विनिर्मुक्तः शिवसायुज्यमाप्नुयात्॥
३१॥ एवं कुरुष्व महाभाग शिवनाम-
सहस्रकं॥ इदं तु संप्रदास्यामि तेन

सर्वार्थमाप्स्यसि ॥ ३७ ॥ अगस्त्यस्याश्रमे दद्यौ
तस्मै शिवनामसहस्रकं ॥ वेदसाराभि
धानितं शिवप्रत्यक्षकारकं ॥ ३८ ॥ उक्तो
ऽतेन रामस्त्वं जप नाम दिवानिशं ॥
ततः प्रसन्नो भगवान् महापाशुप
तास्त्रकं ॥ ३९ ॥ तुभ्यं दास्यति तेनैव संख्य
ख्ये हत्वाप्स्यसि प्रियां ॥ तस्यैवास्त्रस्य मा
हात्म्यात् समुद्रं शोषयिष्यसि ॥ ४० ॥
संहारकाले जगतामस्त्रं तत् पार्वतीप
तेः ॥ तदलाभे दानवानां जयस्तव सुदु
र्लभं ॥ ४१ ॥ तस्मात् लब्धुं तदेवास्त्रं शर
णं याहि शंकरं ॥ ४२ ॥ इति श्रीपद्मपुरा
णे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां

योगशास्त्रे शिवराघवसंवादे उपदेशो
नामतृतीयोध्यायः ॥ ३ ॥ सूत उवाच ॥ ए
वमुक्त्वा मुनिश्रेष्ठे गते तस्मिन्निजाश्र
मे ॥ अथ रामगिरौ रामः पुण्ये गोदा
वरीतटे ॥ १ ॥ शिवलिंगं प्रतिष्ठाप्य कृ
त्वा दीक्षां यथाविधि ॥ भूतिभूषितस
र्वांगो रुद्राक्षाभरणैर्युतः ॥ २ ॥ अभि
षिंच्य जलैः पुण्यैर्गौतमीसिंधुसंभ
वैः ॥ अर्चयित्वा वन्यपुष्पैस्तद्वद्वन्यफ
लैरपि ॥ ३ ॥ भस्मच्छन्नो भस्मशायी
व्याघ्रचर्मासने स्थितः ॥ नाम्नां सह
स्रं प्रजपन्नक्तं दिनमनन्यधीः ॥ ४ ॥
मासमेकं फलाहारो मासं पर्णाम

न कृतं तथा ॥ मासमेकं जलाहारो मासं
तु पवनाशनः ॥ ५ शांतो दांतश्च शान्ता
त्मा ध्यायन्नेवं महेश्वरं ॥ हृत्पंकजे स
मासीनम् उमादेहार्धधारिणं ॥ ६ ॥
चतुर्भुजं त्रिनेत्रं च विद्युत्पिंगजटाध
रं ॥ कोटिसूर्यप्रतीकाशं चंद्रकोटि
सुशीतलं ॥ ७ ॥ सर्वाभरणसंयुक्तं ना
गयज्ञोपवीतिनं ॥ व्याघ्रचर्मांबर
धरं वरदाभयधारिणं ॥ ८ ॥ व्याघ्र
चर्मोत्तरीयं च सुरासुरनमस्कृतं ॥
पंचवक्त्रं चंद्रमौलिं त्रिशूलडमरुध
रं ॥ ९ ॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्ष
रमव्ययं ॥ एवं नित्यं [illegible]पतो गतं मा

मचतुष्टयं ॥ १ ॥ अथस्नातोमहल्लाद:
थलयांबुद्भिषिण: ॥ समुद्रमथनो
त्तमंत्रावामिभद्रकालि: ॥ ११ ॥ रुद्र
वारणाग्निसंहितोभयांस्त्रिपुरविभ्र
म: ॥ तमाकर्णातिसंभ्रांतोयावत्स
पतिपुष्करं ॥ १२ ॥ तावदेवमहत्तेजो
एमस्यासीत्पुरोरि[illegible]ला: ॥ तेजसाते
नसंभ्रांतोनापश्यत्सदिशोदश:
१३ ॥ अंधीकृतेसरणालएर्मोहंया
तोनपाप्तमङ्ग: ॥ विचिंसतर्कयाम
सदैसमायांदिङ्गेश्वर: ॥ १४ ॥ अ
थोत्थायमहावीर: सञ्चक्रलाध
लु:सकं ॥ अविभ्यान्नमगोवाणी

याम्यैरभिमंत्रितैः॥४५॥ आग्नेयं वारु
णं सौम्यं मोहनं सौरपार्वतं॥ विष्णुच
क्रं महाचक्रं कालचक्रं तु वैष्णवं॥४६॥
रौद्रं पाशुपतं ब्राह्मं कौवेरं कालिशाल्म
लं॥ भार्गवादि बहून्यस्त्राण्येष ययौ प्रयु
क्तराघवः॥४७॥ तास्मिंल्लेभासिद्धास्त्रा
णि चास्त्राण्यस्य महीपतेः॥ विली
नानि महाभूस्यकरकाइवनारधौ॥
४८॥ अथलक्ष्मणोनजज्वाल धनुस्त
स्य करात्युतं॥ तूणीरं वांगुलीत्राणं
जोधिकावमहीपते॥४९॥ तंदृष्ट्वा
लक्ष्मणं भ्राता पपात भुवि मूर्छि
तः॥ यथा किंचित्करो रामो जानु

आमभवनीं गतः ॥ २० ॥ मीलिताक्षो
भयाविष्टः शंकरं शरणं गतः ॥ स
रोगात्सुखर स्तुवैः शंभोर्नामस
हस्रकं ॥ २१ ॥ शिवं च दण्डवद्भूमौ
प्रणनाम पुनः पुनः ॥ पुनश्च पू
र्वं चचाल सी वद्वोद्दिङ्मण्डलं
स्फचान् ॥ २२ ॥ चचाल वसुधा घो
रं पर्वताश्च चकंपिरे ॥ अथश्रेण
मचीमान्युज्योतिलं तेजश्चादध
त् ॥ २३ ॥ उन्मीलिताक्षो राम स्तु
यावद्यावत्स पश्यति ॥ तावद्दृष्टं
पभस्ररीलंकारा संयुतं ॥ २४ ॥ वायु
घमण्डलोद्भूतनवनीतस्यापंडव

र॥ श्रोतस्वर्णमरकतछायश्चंगदद्यो
चितं ॥२५॥ नीलपद्मेक्षणं कुस्वकर्ण
कंबलभूषितं ॥ रत्नपल्याणसंयुक्तं
मिवंद्यश्वेतचामरैः ॥२६॥ घंटिकाघ
र्घरैः शब्दैः पूरयंतो दिशो दश ॥ न
मासीनं महादेवं शुद्धस्फटिकविग
हं ॥ २७ ॥ कोटिसूर्यप्रतीकाशं कोटि
शीतांशुशीतलं ॥ व्याघ्रचर्मांबरधरं
नागयज्ञोपवीतिनं ॥ २८ ॥ सर्वालंका
रसंयुक्तं विद्युत्पिंगजटाधरं ॥ नील
कंठं व्याघ्रचर्मोत्तरीयं चंद्रशेखरं ॥ २९ ॥
नानाविधायुधोद्भासिदशबाहुं त्रि
लोचनं ॥ युवानं पुरुषश्रेष्ठं सच्चिदा
नंदविग्रहं ॥ ३० ॥ तथैव च सुखासीनं

अथमधुकवर्द्धनमुद्रा: संयुक्तानामिकांगुष्ठौ लिङ्गो ...: प्रसारितानाम मधुकवर्द्धनसमुद्रा संकल्पाकलशांकेर

श्रि॰ गी॰
॥ ३६ ॥

पूर्णचंद्रनिभाननां ॥ नीलेंदीवरश्या
मामुद्यन्मरकतप्रभां ॥ २९ ॥ मुक्ताभ
रणसंयुक्तां रात्रिं तारान्वितामिव ॥ वि
द्यक्षितिधरोत्तुंगकुचभारभराल
सां ॥ ३० ॥ सदासत्संशयाविषमध्य
देशांतनूदरां ॥ दिव्याभरणसंयुक्तां
दिव्यगंधानुलेपनां ॥ ३१ ॥ दिव्यमा
ल्यांबरधरां नीलेंदीवरलोचनां
अलकोद्भासिवदनां तांबूलगर्भ
सन्तोभितां ॥ ३२ ॥ शिवालिंगनसं
ज्ञातपुलकोद्भिन्नविग्रहां ॥ सच्चिदा
नंदरूपाद्यां जगन्मातरमम्बिकां
॥ ३३ ॥ सौंदर्यसारसंदोहां ध्यात्वा परि

नेंदुनः ॥ स्रुवस्रुवाहनसंयुक्तान्नानाप
युधलसत्करान् ॥ ४६ ॥ रक्तदंतरा
गीलिसामालिपाशिगायुतः ॥ स्रुवस्रु
कांतासमायुक्तान्दिक्पालान्भाविते: ॥
स्थितान् ॥ ४७ ॥ अग्रगांगरुडारूढं
शंखचक्रगदाधरं ॥ कालांबुदप्रती
काशां विद्युत्कांत्या श्रियायुतं ॥ ४८ ॥
जपेतमेकमनसा हृदा ध्यायं जना
र्दनं ॥ पश्चाच्चतुर्मुखं देवं ब्रह्माणं हं
सवाहनं ॥ ४९ ॥ चतुर्वक्त्रैश्चतुर्वेदै:
कमलैर्महेश्वरं ॥ स्तुवंतं भारतीयुक्तं
दीर्घकूर्चजटाधरं ॥ ५० ॥ अथर्वांगिर

सादेवं स्तुवंतं मुनिमंडलं॥ गंगादि
टनीयुक्तमंबुधिं नीलविग्रहं॥४१॥ श्वे
ताश्वतरमंत्रेण स्तुवंतं गिरिजापतिं
अनंतादिमहानागान्कैलासगिरि
सन्निभान्॥४२॥ कैवल्योपनिषत्पा
न्मणिरत्नविभूषितान्॥ सुवर्णवेत्र

ठ

हस्ताढ्यं नंदिनं पुरतः स्थितं॥४३॥ द
क्षिणे मूषिकारूढं गणेशं पर्वतोप
मं॥ मयूरवाहनारूढमुत्तरे षण्मु
खं तथा॥४४॥ महाकालं च चंडीशं पा
र्श्वयोर्भीषणाकृती॥ कालाग्निरु
द्रं दूरस्थं ज्वलदावाग्निसंनिभं॥४५॥

त्रिपादं कुटिलाकारं नटद्भृंगिरिटिं पु
नः॥ नानाविकारवदनान् कोटिशः
प्रमथाधिपान्॥ ४६॥ नानावाहन
संयुक्तान् परितो मातृमंडलं॥ पंचा
सद्वीजपाशाक्रान्तिभिश्च विद्याधरादि
कान्॥ ४७॥ दिव्यरुद्रकगीतानि गाय
त्किन्नरवृंदकं॥ तत्र त्रैयंबकं मंत्रं जप
द्विजकदंबकं॥ ४८॥ गायन्तं वीणया
गीतं नृत्यंतं नारदं दिवि॥ नृत्यतो ना
ट्यमेनां रंभादीनप्सरोगणान्॥ ४९॥
गायच्चित्ररथादीनां गंधर्वाणां क
दंबकं॥ कंबलाश्वतरौ भोः कर्णकुंड
लतां गतौ॥ ५०॥ गायन्तौ पन्नगौ गीत

कपालं कं बलं तथा॥ एवं देवसभां दृ-
ष्ट्वा कृतार्थो रघुनंदनः॥ ११॥ हर्षगं-
द्गदया वाचा स्तुवंदेवं महेश्वरं॥ दि-
व्यनामसहस्रेण प्रणनाम पुनः
पुनः॥ १२॥ इति श्री पद्मपुराणे शि-
वगीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे शिवराघवसंवादे शिव-
प्रादुर्भावो नाम चतुर्थोऽध्यायः॥ ४॥
सूत उवाच॥ अथ प्रादुरभूत्तत्र दि-
व्य एकरथो महान्॥ अनेकदिव्यर-
त्नांशु किर्मीरित दिगंतरः॥ १॥ सुघ-
वांचितपकाल्लामकाचक्रचतुष्टयः
मुक्तातोरणसंयुक्तः श्वेतछत्रशतान्वि-

रतः॥२॥शुद्धहेमखलीनाग्र्यतुरंग
गणसंयुतः॥मुक्तावितानविलस
दूर्ध्वदिग्ध्वजपटः॥३॥प्रमत्तकरि
णीयुक्तः पद्मरागोपशोभितः॥पा
रिजातमहोत्पलपुष्पमालाभिरंचि
तः॥४॥मृगनाभिसमुद्भूतकस्तूरीम
दपंकिलः॥कर्पूरागरुधूपाद्यगंधा
कृष्टमधुव्रतः॥५॥संवर्त्तघनघोषाढ्यो
नानावाद्यसमन्वितः॥वीणावेणु
स्वनासक्तकिन्नरीगणसंकुलः॥
६॥एवंरूपरथश्रेष्ठरूपादुत्तीर्य
शंकरः॥अंबयासहितस्तत्रपद्म
लोविभ्राजद्दा॥७॥सुरनीराजनैस्त्राणां

श्वेतचामरचालनैः ॥ दिग्गजाननपा
लैश्च प्रहृष्टो नीललोहितः ॥ ८ ॥ कं
णत्कंकणनिर्घोषैर्मंजमंजीरसिं
जितैः ॥ वीणावेणुस्वनैर्गीतैः पूर्ण
मासीज्जगत्त्रयं ॥ ९ ॥ पुंवाकाम्रकु
लारावैः श्वेतपारावतस्वनैः ॥ उभि
रूभषाफणिनोदर्शनाद्देववार्हिणः ॥
१० ॥ नन्दस्तु दर्शयंतः स्थानं चंद्रका
न्तकोटिसंख्यया ॥ प्रणमंतं ततो
राममुत्थाप्य वृषभध्वजः ॥ ११ ॥ स्था
लिनाय रथं दिव्यं प्रहृष्टेनांतरा
त्मना ॥ कमंडलुजलैः स्वच्छैः स्वयं
माचम्य यत्नतः ॥ १२ ॥ नमाचम्याथ

पा

पुरतस्तांकेराममुनेर्यतः॥ अथदिव्यं
धनुस्तस्मैददौतूणीरमक्षयं॥१२॥ म
हापाशुपतंनामदिव्यमस्त्रंददौत
तः॥ उक्तश्चानेनरामोपिप्रसादंचंद्रमौ
लिनः॥१४॥ अगम्याथाकरंरौद्रंसुग
मस्थानमिदंतप॥ अतोनेदंप्रयोक्तव्यं
सामान्यसमरादिके॥१५॥ अन्यस्मि
क्षिप्रतीघातमेतस्यभुवनत्रये॥ न
स्मात्प्राणात्ययेरामप्रयोक्तव्यमुप
स्थिते॥१६॥ अन्यदैत्यस्यशक्तंतुजं
गतांसंक्षयकृद्भवेत्॥ अथाहूयसुरश्रे
ष्ठान्लोकपालान्महेश्वरः॥१७॥ उवा
चपरमप्रीतिःस्वंस्वमस्त्रंप्रयच्छत॥

राघवोयं चतै रक्षो रावणो निहनिष्य
सि ॥ ५५ ॥ तस्मै देवैरवध्यत्वमिति दत्तो
वरो मया ॥ तस्मात्कालान्तरेनामेत्यभ
वंतो युद्धदुर्मदः ॥ ५६ ॥ साहाय्यम
स्य कुर्वंतु तेन सुस्था भविष्यथ ॥ त
स्मांश्चिरसाभ्यर्थ्य सुराः प्रांजल
यस्तथा ॥ ५७ ॥ प्रणम्य चरणौ शंभोः
स्वं स्वमस्त्रं ददुर्मुदा ॥ नारायणा
स्त्रं दैत्यारिर्वज्रमस्त्रं पुरंदरः ॥ ५८ ॥ ब्र
ह्मापि ब्रह्मदंडास्त्रमाग्नेयास्त्रं
धनंजयः ॥ याम्यं यमोपि मोहास्त्रं
रक्षोराजस्तथाददौ ॥ ५९ ॥ वरुणो
वारुणं पाशं वायव्यास्त्रं प्रभंजनः ॥

कौबेरंचकुबेरोपिरौद्रमीशानमेव
वच॥२५॥ सौरमष्टदलेसूर्यःसौ
म्यंसोमश्चपावकं॥ विश्वेदेवाःद्दुल
सैनसर्वावासवाभिधं॥२६॥ अथचतु
र्थंचरणंमेश्रृंरामोदशरथात्मजः॥
पांजलिःप्रणतोभूत्वाभक्तियुक्तो
भिपृष्टवान्॥२७॥ भगवन्मानुषेलो
केनोल्लंघ्योलवणांबुधिः॥ तत्रलंका
भिधंदुर्गंदुर्जयंदेवदानवैः॥२८॥ अ
नेककोटयस्तेचराक्षसावंतः॥ स
र्वेस्वाध्यायनिरताःशिवभक्ताजिते
न्द्रियाः॥२९॥ अनेकमायासंयु
क्ताबुद्धिमन्तोग्निहोत्रिणः॥ कथ
मेकाकिनाजेयामयाभ्रात्राचसंयु

बल

गः॥ २९॥ श्रीभगवानुवाच॥ रावणस्य
वधेरामरक्षसामपिमारणे॥ विचा
रेणत्वयाकार्यंसमयःकालेयमाग
तः॥ ३०॥ अधर्मेपिप्रवृत्तास्ते देवब्रा
ह्मणपीडनैः॥ तस्मादायुःक्षयंया
तेतेषांश्रीरपिमुंचति॥ ३१॥ राजसूय
संघनास्रक्रैरावणांलिहन्निष्यसि॥
पापासक्तोरिपुर्जेतुंसुकरःसंग
रांगणे॥ ३२॥ अधर्मनिरतःशत्रु
र्भाग्येनैवाद्यलभ्यते॥ आधर्तिष्ठ
ष्ठोपिसदाधर्मरतोपिवा॥ ३३॥
विनाशकालेसंप्राप्तेधर्ममार्गाच्यु
तोभवेत्॥ पीड्यंतेदेवताःसर्वाःसत

तैर्येनपापिना ॥ २२ ॥ ब्राह्मणानांप्र-
पयश्चैवतस्यनाथः स्वयंस्थितः ॥
किष्किंधानगरेरामदेवानामंशसं-
संभवाः ॥ २४ ॥ वानराः बहवोजाता
दुर्जेयाबलवत्तराः ॥ साहाय्यंतेक-
रिष्यंतितैर्बध्वाथपयोनिधिं ॥ २५ ॥
अनेकशैलसंबद्धेसेतौयांतुबलीमु-
खाः ॥ रावणंसंगरेहत्वातामानयन्
निजप्रियां ॥ २६ ॥ शस्त्रैर्युद्धेजयोय-
त्रतत्रास्त्राणिनयोजयेत् ॥ निर-
स्त्रेषुसशस्त्रेषुपलायनपरेषुच
॥ २७ ॥ शस्त्राणिमुक्तादिव्यानिस्वय-

श्री॰गी॰

॥२२॥

मेवविनयूपाति ॥ अथ किं बहुनोक्ते
न मयैवोत्पादितं जगत् ॥ ४३ ॥ मय्ये
व पाल्यते नित्यं मया संह्रियतेपि च ॥
अहमेकोऽग्रजन्मासुरस्सोपि म
हीपते ॥ ४४ ॥ ग्रसे हमेव सकलं जग
देतच्चराचरं ॥ मम वक्त्रे हताः सर्वे
समायुध्यहुर्मुदः ॥ ४५ ॥ निमित्तमा
त्रं त्वं भूयाः कीर्तिमाप्स्यसि संगरे ॥
इति श्री पद्मपुराणे शिवगीतासू
पनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शि
वराघवसंवादे रामस्याल्पप्रशिनी
म पंचमोध्यायः ॥ ५ ॥ श्रीराम उवाच
भगवन्मम मे चित्रं महदेतत्प्रजाय

ति॥ शुद्धस्फटिकसंकाशास्त्रिनेत्रश्च
न्द्रशेखराः॥ १॥ त्रिमूर्त्तिलंपाशिधिन्वा
कृतिः पुरुषरूपधृक्॥ अंबयासहि
तोत्रैवरमसेत्रमयेःसह॥ ३॥ लंकण्य
पंचभूतादिलिंगदेत्त्राणवरं॥ तद्ब्रूहि
गिरिजानाथ मयि ते नुग्रहो यदि॥
४॥ श्रीभगवानुवाच॥ साधु पृष्टं म
हाभागा दुर्लेयममरैरपि॥ तत्तवक्ष्या
मि यत्नेन प्रेमबद्धेन सुव्रते॥ ५॥ पा
रंयाणस्पर्शनायासात्तेनसंसारनी
र्धेः॥ ईशंमे पंचभूतानि येन लो
कास्तु ईशा॥ ६॥ सप्तद्राःपर्वताः द्
याद्यसमास्वयस्तथा॥ इदंपते

शि॰गी
॥ २२ ॥

यानिचान्यानिस्थावराणिचरा
णिच॥ ६ ॥ गंधर्वाःप्रमथानागाःभ
वंतिमद्विभूतयः॥ पुराब्रह्मादयोदे
वाद्रष्टुकामाममाकृतिं॥ ७ ॥ संप्र
ययुःसर्वेममप्रियतरंगिरिं॥ स्तु
त्वाघ्यांज्येष्ठोदेवामांतदासुरतःस्थि

ल

ताः॥ ८ ॥ मांदृष्ट्वाथमयादेवान्लीं
लाकुलितचेतसा॥ तेषामपहृतंज्ञा
नंब्रह्मादीनांदिवौकसां॥ ९ ॥ अथ
तेपहृतज्ञानाममाग्रतःकोभवानि
ति॥ यथाब्रुवमहंदेवानहमेवपुरा
तनः॥ १० ॥ आसंप्रथममेवाहंवर्तामि

म

चसुरेश्वराः॥ भविष्यामिचलोकेषु

म्यंत्रो नाम्योस्मि कश्यनः॥२१॥ आनिरि
तं च भगोस्मि नाम्यांल्किं चित्सुरेश्वराः॥
न्नि मो नास्मि यो हम्स्य ष्ये याभ्रमण्णां बृस्य
ण स्पातिः॥२२॥ दक्षिणा च उंदं चो हं प्र
चः प्रसंचं एव च॥ अथ धर्म्मोर्द्धं चाविद्
षो द्विजश्चाहं सुरेश्वराः॥२३॥ सावि
त्री चापि गायत्री स्त्री पुमान्नपुमान
पि॥ त्रिष्टुब्जगत्यनुष्टुप्पंक्तिः छंदसु
स्थियामयः॥२४॥ सत्योहं सर्वमः श्रां
म स्थिता स्मि गोरु हं गरुडः॥ गोर्वाहं ग
रुडं चाहं घोरं हं जगताम्प्रभुः॥२५॥
श्रेष्ठः सर्वसुरश्रेष्ठो वसिष्ठोहमपां
पतिः॥ आर्यो हं भगवान्नी श्रुतो ओहं

चादित्यहं॥१६॥ऋग्वेदोहंयजुर्वेदः
सामवेदोहमात्मभूः॥अथर्वणाश्चमं
त्रोहंतथाचांगिरसांवरः॥१७॥इतिहा
सपुराणानिकल्पोहंकल्पवानहं॥ना
राशंसगेःस्थितिश्चाहंविद्योपनिष
दोप्यहं॥१८॥श्लोकाःसूत्राणिचैवाह
मनुव्याख्यानमेवच॥व्याख्यानानित
थाविद्याइष्टंहुतमथाहुतिः॥१९॥द
ष्टादृष्टमयंलोकःपरलोकोहमक्षरं
वहिश्चाहंतथाचांतःपुरस्तादहम
व्ययः॥२०॥ज्योतिश्चाहंपरंब्रह्मतस्मा
त्राणींद्रियाण्यहं॥बुद्धिश्चाहमहं
कारोविषयाहमेकलः॥२१॥ब्रह्माविः

महेशोहमुमास्कंदोविनायकः।
इंद्रोग्निश्चयमश्चाहंनिर्ऋतिर्वरु
णोनिलः॥२॥कुबेरोहंतथेशानो
भूर्भुवःस्वर्महर्जनः॥तपःसत्यंच
पृथिवीचापस्तेजोनिलोप्यहं॥३॥
आकाशोहंरविःसोमोनक्षत्राणि
ग्रहाह्यहं॥प्राणःकालस्तथामृ
त्युरमृतंभूतमप्यहं॥४॥भव्यंभवि
ष्यंकृत्स्नंचविश्वंसर्वात्मकोप्यहं॥
आमादौचतथामध्येभूर्भुवःस्व
स्तथैवच॥५॥ततोहंविश्वरूपोस्मि
शीर्षंचजगतांसदा॥अशितंपीतं
चाहंकृतंचाकृतमप्यहं॥६॥परंचैवा
परंचाहंसर्वपरायणं॥अहं

गछिंतं दिव्यमक्षरं सक्षममव्ययं ॥ २७ ॥
प्राणापानः पार्थ चैव सोम्यमग्राह्यम
गियं ॥ अहमेवापसंहन्नीस्वलोकं सं
जमात्निधिः ॥ २८ ॥ हृदये देवतात्वेन
प्राणत्वेन प्रतिष्ठितः ॥ शिरश्चोत्त
रतो यस्य पादौ दक्षिणतस्तथा ॥ २९ ॥
यः सर्वोत्तरतः साक्षादोंकारोऽहं त्रि
मात्रकः ॥ ऊर्ध्वमुत्तमयेथ स्याद
धश्चापनयेमृडः ॥ ३० ॥ तस्मादोंका
र एवाहमेकोनित्यः सनातनः ॥ ऋ
चो यजूंषि सामानि ॥ यो ब्रह्मा यद्दे
कर्माणि ॥ ३१ ॥ प्रणामयेद्ब्राह्मणेभ्य
स्तेनाहं प्रणवो मतः ॥ सोलोयथा मा
सपिंडं याप्राप्नीयपयस्यापि ॥ ३२ ॥ स

यो लोकान्न हन्ताहं सर्वव्यापी ततोस्म्य
हं ॥ ब्रह्मा हरिश्च भगवानाद्यंतं नोपलं
धवान् ॥ ३३ ॥ ततो मे वसुरायस्माद
नंतोहमंतो यतः ॥ गर्भजन्मजरामृत्यु
संसारभयसागरात् ॥ ३४ ॥ तारयामि
यतो भक्तांस्तस्मात्तारोहमीरितः ॥ च
तुर्विधेषु देहेषु जीवत्वेन वसाम्यहं ॥
३५ ॥ सूक्ष्मो भूत्वा च हृदये यत्तत्सूक्ष्मं
प्रकीर्तितः ॥ महातमसि मग्नेभ्यो
भक्तेभ्यो यत्प्रकाशये ॥ ३६ ॥ विद्युद्वत्तु
लं रूपं तस्माद्वैद्युतमस्म्यहं ॥ एक एव
यतो लोकान्विसृजामि सृजामि च ॥
३७ ॥ वासयामि च गृह्णामि तस्मादेको
हमीश्वरः ॥ न द्वितीयो यतस्तस्थे तुरी
यं ब्रह्म यत्स्वयं ॥ ३८ ॥ भूतान्यात्मनि सं

पौष्छ्यासज्जेमसंगृमे धर्मेत प्रीतिगुरो
भृत्ताविद्याधारवसन्तं स्वयंगोपुर
तीत लोकाधवादं नयं ... स्तेषु लो

हमतेकोरुद्रेवसाम्यहं ॥ सर्वान्लोका
न्विशेहंच ईशनीभिः स्वशक्तिभिः ॥
२६ ॥ ईशानमस्यजगतः स्वदृशंच
सुरीश्वरं ॥ ईशानमिन्द्रियं चाथ स
र्वेषामपि सर्वदा ॥ २७ ॥ ईशानः सर्व
विद्यानां यदीशानस्ततोस्म्यहं ॥
सर्वान्भावान्परीक्षेहमात्मज्ञानं
निरीक्षये ॥ २८ ॥ योगं च गमयेयस्
स्माद्भगवान्हमतोयतः ॥ अजस्रं च
ग्रसाम्रामि विसृजामि सृजामि च
॥ २९ ॥ सर्वाल्लोकान्नासयामि तेना
हं वैमहेश्वरः ॥ महत्यात्मज्ञानयो
गैरैश्वर्येस्तुमहीयते ॥ ३० ॥ सर्वा

निश्चांतिके रात्तःमदमने संसृर्गभीके
रवले एतेगुरुणव संप्रिनिर्म्मस्तयुग
ते भ्यानेस्मैपी नमः

भगवान्महादेवः स उ ऽन्यवानितो
स्म हं॥ एषोऽस्मि देवः प्रदिशोऽपि स
र्वाः पूर्वो हि जातोऽस्म्यहमेव गर्भे
४४॥ अहं हि जातस्य जनिष्यमा
णः प्रत्यङ्जनास्तिष्ठति सर्वतोमु
खः॥ विश्वतश्चक्षुरुत विश्वतोमु
खो विश्वतोबाहुरुत विश्वतःस्पा
त्॥४५॥ सं बाहुभ्यां धमति सं पतत्रै
द्यावाभूमी जनयं देव एकः॥ बाला
ग्रमात्रं हृदयस्य मध्ये विश्वं देवं जा
तवेदं वरेण्यं॥ ४६॥ मामात्मस्थं ये
नुपश्यंति धीरास्तेषां शांतिः शाश्वती
नेतरेषां॥ अहं योनिमधितिष्ठामि

त्वैकोव्ययेत्पूर्वेपंचविधंचसर्वे ॥४७॥
मामीशानंपुरुषंदेवमीड्यंविचार्य
मांयांतिमत्संनमेति ॥ प्राणेष्वंतर्म
नसोलिंगमाहुर्यस्मिन्याचसुखंत
थाकाशमाव ॥४८॥ तत्राग्निंलाहेतु
आत्तस्पमलंबुध्वासंचिंतयस्थाप
यित्वामयेद्ह ॥ एवंयेमांध्यायमाना
भजंतेतेषांशांतिःशाश्वतीनेतरे
षां ॥४९॥ नित्योनित्यानांचेतनश्चे
तनानांएकोबहूनांयोविदधाति
कामान् ॥ यतोवाचोनिवर्तंतेअप्रा
प्यमनसासह ॥५०॥ आनंदंब्रह्मणो
विद्वान्नबिभेतिकुतश्चन ॥ श्रुत्वेतिदे

वांसशांकंचैवरत्नानसमुद्रमं ॥ ५१ ॥ ज
पंतोममनामामानिममध्यानपराय
णा: ॥ सर्वेनेस्वस्वदेहंतेमत्मायुज्यंग
ता:सुरा: ॥ ५२ ॥ मत्तोयेपरिहृत्यंपंतेपत
र्यामहिभूतय: ॥ मय्येवसकलंजातं
मयिसर्वंप्रतिष्ठितं ॥ ५३ ॥ मयिसर्वं
लयंयातितद्ब्रह्माद्वयमस्म्यहं ॥ अणो
रणीयानहमेवतद्वन्महानहंविश्व
मिदंविचित्र: ॥ ५४ ॥ पुरातनोहंपुरुषो
हमीशोहिरण्मयोहंशिवरूपमस्मि ॥
अपाणिपादोहमचिंत्यशक्ति: पश्या
म्यचक्षु: सशृणोम्यकर्ण: ॥ ५६ ॥ अहं
विजानामिविविक्तरूपोनचास्तिवे
त्तामममाचिन्मसदाहं ॥ वेदैरनेकैरहमेव

वेद्यो वेदांतकृद्वेदविदेव चाहं ॥ ५७ ॥ नपु
ण्यपापे मम नास्ति नाशो न जन्म दे
हेन्द्रियबुद्धिरस्ति ॥ न भूमिरापो न च व
ह्निरस्ति न चानिलो मेस्ति न मे नभश्च
॥ ५८ ॥ एवंविदित्वा परमात्मरूपं गुहाश
यं निष्कलमद्वितीयं ॥ समस्तसाक्षी स
दसद्विहीनं प्रयाति शुद्धं परमात्म
रूपं ॥ ५९ ॥ एवं मां तत्वतो वेत्ति यस्तु रा
म महामते ॥ स एव नान्यो लोकेषु कै
वल्यफलमश्नुते ॥ ६० ॥ इति श्रीपद्मपु
राणे शिवगीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे शिवराघवसंवादे
विभूतियोगो नाम षष्ठोऽध्यायः ॥ ६ ॥
श्रीराम उवाच ॥ भगवन्यन्मयापृष्टं

नतत्रैवस्थितंविभो ॥ नचोत्तरंसमग्रां
लंपंथंलब्धोनैवमहेश्वर ॥ १९ ॥ परिछि
न्नपरीमाणोदेहेभगवन्नस्तव ॥ उत्प
त्तिःपंचभूतानांस्थितिर्वाविलयंकु
थं ॥ २० ॥ स्वस्वाधिकारसंबद्धाःकथंना
मस्थितासुराः ॥ तेसर्वेत्वंकथंदेवभु
वनानिचतुर्दश ॥ २१ ॥ सन्नःश्रुतापि
देवात्रसंदेहोमेमहानभूत ॥ यस्मा
यन्निश्चितस्यासंशयंछेत्तुमर्हसि ॥ २२ ॥
श्रीभगवानुवाच ॥ वटवीजेसुसूक्ष्मे
पिमहान्वटतरुर्यथा ॥ सर्वदास्तिमा
यावत्सःकृतन्यायात्तिनदृढ ॥ २३ ॥ त
दन्नमत्तनौरामभूतानामागतिर्ल
यः ॥ महासैंधवपिण्डोपिजलेक्षिप्तो

विलीयन्ते ॥६॥ नष्टेपटलेपुनःकाका
स्तत्रायान्तिपूर्ववत् ॥ प्रातःप्रातर्य
थालोकेजायन्तेसूर्यमंडलात् ॥७॥
एवंमत्तोजगत्सर्वंजायतेस्तुविली
यते ॥ मय्येवसकलंरामतद्विद्ध्यासी
हिसुव्रत ॥८॥ श्रीराम उवाच कथि
तोपिमहाभागदिग्जडस्ययथादि
शां ॥ निवर्त्ततेभ्रमोनैवतद्वन्मम
करोमिकिं ॥९॥ श्रीभगवानुवाच ॥
मयिसर्वंयथारामजगदेतच्चराच
रं ॥ वर्त्ततेतद्दर्शयामिनद्रष्टुंक्षमते
भवान् ॥१०॥ दिव्यंचक्षुःप्रदास्यामि
तुभ्यंदशरथात्मज ॥ तेनपश्यभयं
त्यक्त्वामत्तेजोमंडलंध्रुवं ॥११॥ न

चर्मचक्षुषा द्रष्टुं शक्यते मामकं म
हः॥ नरेण वासुरेणापि तन्मयानु
ग्रहं विना ॥ २२ ॥ इत्युक्त्वा प्रददौतस्मै
दिव्यं चक्षुर्महेश्वरः ॥ तथादर्शयद्दे
हस्यैव वक्त्रं पातालसन्निभं ॥ २३ ॥ वि
द्युत्कोटिप्रभं दिव्यमतिभीमं भया
वहं ॥ तद्दृष्ट्वैव भयाविष्टो राजानुभ्या
मवभ्रांगतः ॥ २४ ॥ प्रणम्य दण्डवद्भू
मौ तुष्टाव च पुनः पुनः ॥ यथोत्था
य महीपीरो यावदेवश पश्यति ॥ २५ ॥
वक्त्रे पुरभिदस्तत्र संस्तब्रह्माण्डकोट
यः ॥ चटकाइवलक्ष्यन्ते ज्वालामाला
समाकुलाः ॥ २६ ॥ मेरुमंदरविंध्या

त्रि·गी
॥ ३॥

ध्यागिरयः सप्तसागराः॥ द्वीपानि चैव
ग्रहर्क्षौघाः पंचभूतानि ते सुराः॥ १॥
वरणानि महाभागा भुवनानि
चतुर्दश॥ अतिवृह्माण्डमेवं तु दृष्ट्वा
स्थिरथात्मज॥ ५५॥ सुरासुराणां सं
ग्रामांस्तत्र पूर्वापरानपि॥ विस्मितोऽद्र
यावतारांश्च तत्कर्तॄन्यामि चण्डिकाः॥
५६॥ पराभवांश्च देवानां पुरा हृन्म
होद्धतैः॥ उत्पद्यमानान्नश्यमानान्स
र्वानपि विनष्टपत्तः॥ ५७॥ दृष्ट्वारामो भ
याविष्टः प्रणम्य च मुहुर्मुहुः॥ उप
त्यनलब्धानोऽथ वभ्रवन्नृपनेहन॥
ग्रंथोपनिषद्दासारै रथैस्तु सव

शांकरं॥ आनंदपरमानंदसर्वांगंदे
परिस्थितः॥२२॥श्रीमहादेव
अपर्याप्त्रि हर प्रसीद प्रसीद विश्वेश्व
र विश्ववंद्य॥ प्रसीद गंगाधर चंद्रमौ
ले मां त्राहि संसारभयादनाथं॥२३॥
त्वत्तो हि जातं जगदेतदीश त्वय्येव
भूतानि वसंति नित्यं॥ त्वय्येव शंभो
विलयं प्रयांति भूमौ यथा वृक्षलता
दयोपि॥२४॥ ब्रह्मेंद्ररुद्रादिमरुद्ग
णाश्च गंधर्वयक्षासुरसिद्धसंघाः॥
गंगादिनद्यो वरुणालयश्च वसंति
शूलिन्तव वक्त्रयंत्रे॥२५॥ त्वन्माय
या कल्पितमिंदुमौले त्वय्येव दृश्यत्व
मुपैति विश्वं॥ ओं भाजनः पशुपतिवि

यमेन त्वद्भक्तौ यथा रूपमहिं चरन्तौ ॥
२६ ॥ तेजोभिरापूर्य जगत्समस्तं प्रका
शयस्यजित्रांल्लोकभानुमन् ॥ विना
प्रकाशं न वदेव देवन्न च पश्यते विश्वमि
दं स्वरूपेण ॥ २७ ॥ मूलाश्रयो मे व वदं
न मर्थ धन्ते एव रैको महि विं धात्रौलं ॥
त्वच्चक्रमायेज गदेत द्विलन्माय
यैवोति विनिस्वयामि ॥ २८ ॥ रज्जौ भु
जंगो भय दोष थैव मजायते भास्मि
न चैति नात्र ॥ त्वन्मायया केवल मा
म रूपं तथैवाविश्वं त्वयि नीलकंठ ॥ २९ ॥
विचार्यमाणे तु वय त्वशरीरमाधा
रभावं जगतामुपैति ॥ न रूपवद्रूपमत्न
विद्ययैव पूर्णाम्भितानंदमयायतन्न

त्वं ॥ ३६ ॥ पूर्वोष्टपूर्वोपि विरक्तिक्रियाणां
भोक्ताफलेयष्यातियत्नमेव ॥ ममैत
द्देवंवचनंपुराणैस्त्वन्नोस्तिभिन्नंनहिकिं
चिदेव ॥ ३७ ॥ अज्ञानमूढमुनयोवदं
तिपूजोपहारादिवहिःक्रियाभिः ॥ ते
षांविरिंचोभवतीतिमिथ्याकुनस्य
मूर्खस्यतुभोगलिप्सा ॥ ३८ ॥ किंचिद्द
लेवाचुलकोदकंवायत्त्वंमहेशायनि
वेदयधत्से ॥ त्रैलोक्यलक्ष्मीमपियऽ
भ्यःसर्वंत्वयाविधाकृतमेवमन्ये ॥ ३९ ॥
ध्याप्नोषिसर्वाविदिशोदिशाश्चत्वंवि
श्वमेकःपुरुषःपुराणः ॥ नष्टेपित
स्मिन्नवनास्तिहानिर्घटेविनष्टेन
भसोयथैव ॥ ४० ॥ यथैवमाकाशग

शि॰गी
॥ ३३॥

मर्कविंबं स्वुद्रेषु पात्रेषु जलान्वितेषु॥
भजत्यनेकप्रतिविंबभावं तथात्वमंतः
करणेषु देवः॥ ३४॥ स्तुसर्जनेवाप्यवने
विनाशे विश्वस्य किंचित्तव नास्ति का
र्यं॥ अनादिभिर्देहभृतामदृष्टैस्तथा
पि तत्स्वपूर्ववृत्तमोघि॥ ३५॥ स्थूलस्य
सूक्ष्मस्याजडाजडस्य देहस्य शोभान
चिरं विनास्ति॥ अतस्तदारोपणमा
तनोति श्रुतिः पुरारेसुखदुःखयोस्तु
३७॥ नमः सच्चिदंभोधिहंसाय तुभ्यं
नमः कालकंठाय कालांतकाय॥ न
मस्ते समस्ताघसंहारकैर्नमस्तेऽ
गस्तित्वरूपैकभोक्त्रे॥ ३८॥ स्वयं प्रणाम
विश्वैः गाधालिः पुरतः स्थितः॥ वि

स्थितः परमेशानं जगाद रघुनंदनः॥
॥३९॥ उपसंहर सर्वात्मन्विश्वरूपमि
दं तव॥ प्रतीतं जगदैकात्म्यं दृष्टं भोभ
वदनुग्रहात्॥४०॥ श्रीभगवानुवाच॥
पश्य राम महाबाहो मत्तो मायापि
कल्पनं॥ इत्युक्त्वैवोपसंजह्रे स्वदे
हे देवतादिकान्॥४१॥ मिलितास्तः पु
नर्देवा घोषवद्रामः प्रपश्यति॥ भाव
देवगिरेः श्रृंगे व्याघ्रचर्मोपरि स्थि
तं॥ ददर्श पंचवक्त्रं नीलकंठं त्रिलो
चनं॥ व्याघ्रचर्मांबरधरं भूतिभूषित
विग्रहं॥४२॥ फणिकंकणभूषाढ्यं
नागयज्ञोपवीतिनं॥ व्याघ्रचर्मोत्तरे

शीर्षं च विद्युत्पिंगजटाधरं ॥४४॥ एका
किनं चंद्रमौलिं वरेण्यमभयप्रदं ॥ च
तुर्भुजं खड्गपरशुमृगहस्तं जगत्प
तिं ॥४५॥ अथाग्रपुरतस्तस्य प्रण
म्यापादविवेश्मसः ॥ अथाहरामं देवे
शो यद्यदस्तु मभिप्सिसि ॥४६॥ त
त्सर्वं वृणु राम त्वं मत्तो नान्योस्ति
गुरुः ॥४७॥ इति श्री पद्मपुराणे शि
वगीतासूपनिषत्सु ब्रह्मविद्यायां यो
गशास्त्रे शिवराघवसंवादे विश्वरूप
दर्शनो नाम सप्तमोध्यायः ॥७॥ श्री
राम उवाच ॥ पांचभौतिकदेहस्य चो
त्पत्तिर्विलयः स्थितिः ॥ स्वरूपं च क

वदेहे भगवन्वक्तुमर्हसि ॥ १ ॥ श्रीभ
गवानुवाच ॥ पंचभूतैः समारब्धो दे
होयं पांचभौतिकः ॥ तत्रप्रधानं पृ
थिवी शेषाणां सहकारिता ॥ २ ॥ ज
रायुजोंडजश्चैव स्वेदजश्चोद्भिज्जस्त
था ॥ एवं चतुर्विधः प्रोक्तो देहोयं पां
चभौतिकः ॥ ३ ॥ मानसोपि परः प्रो
क्तो देवानामेव संभृतः ॥ तत्र व
क्ष्ये षष्ठमतः प्रधानत्वाज्जरायुजं ॥
च ॥ शुक्रशोणितसंभूत धातिरेव ज
रायुजं ॥ स्त्रीणां गर्भाशये शुक्रमृतु
काले विशेद्यदा ॥ ४ ॥ रजसा योषि
ता युक्तं तदेवस्याज्जरायुजं ॥ बाहु
ल्याद्रजसः स्त्रीस्याच्छुक्राधिकात्पु

स्वर्वे दम्बोंऽस्वं संहननसुख पुत्रमित्र गेह स्तथा कांता
स्थाने पुंरत्नं पतत्पात पुंस्त्रेह भवं स्पाँस्थातं

मा भवेत्॥ ६॥ शुक्रशोणितयोर्मास्त्रि
जायते च नपुंसकः॥ ऋतुस्नाता भवे
न्नारी चतुर्थे दिवसे ततः॥ ऋतुकाल
स्तु निर्दिष्ट आषोडशदिनावधि॥ तत्रा
युग्मदिने स्त्री स्यात्पुमान्युग्मे दिने
भवेत्॥ ७॥ षोडशो दिवसे गर्भो जाय
ते यदि सुभ्रुवः॥ चक्रवर्ती तदा जा
यते च न संशयः॥ ८॥ ऋतुस्नाता
यस्य पुंसः साकांक्षं मुखमीक्षते॥
तदाकृतिर्भवेद्गर्भस्तत्पश्येत्स्वामि
नो मुखं॥ ९॥ या स्त्री चर्माधृतिः सूक्ष्मा
जरायुः सा निगद्यते॥ शुक्रशोणित
योर्योगस्तस्मिन्नेव भवेद्यतः॥ १०॥
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्ता जरा

त्रि· गी
॥ ३५॥

रंव विक्र भव कांता वाहन मारावक

मनुजंकर्मा वसगतहै: ॥ दसिंहदन्तभान भातस्य

युजः ॥ अंडजाः पक्षिसर्पाद्याः स्वेद जामशकादयः ॥ १२ ॥ उद्भिजा वृक्षगुल्माद्या मानसाश्च सुरर्षयः ॥ जन्म कर्मवशात्सर्वेयानिषिक्तेस्मरमंदिरे ॥ शुक्ररक्तः समायुक्तः प्रथमेमासितद्रवं ॥ बुद्बुदंकालिलंयस्मात्ततः पेशी भवेदिदं ॥ १४ ॥ पेश्याघनं द्वितीयेतु मासिपिंडःप्रजायते ॥ करांघ्रिशीर्षकाद्यानितृतीयेसंभवंतिहि ॥ १५ ॥ आभिव्यक्तिश्चजीवस्य चतुर्थेमासिजायते ॥ ततश्चलतिगर्भोपिजनन्याजठरेस्थितः ॥ १६ ॥ पुत्रश्चदक्षिणेपार्श्वेकन्यावामेवतिष्ठति ॥ नपुंसकस्तूदरस्यभागेतिष्ठ

स्य सा ... पुंस्तात् दक्षे ... मात

द्वि॰गी
॥ ३१ ॥

तिमध्यमे ॥ १७ ॥ अथो दक्षिणपार्श्व
स्थो लेमाता प्रमान्यादि ॥ अंगप्रत्यं
गभागाश्च सूक्ष्मा सुयुगपत्रत् ॥
१८ ॥ विहायश्मश्रुदंतादीन् ज्ञेयानं
तरसंभवात् ॥ एषां प्रकृतिकस्यापि
विकृतिः संमता सतां ॥ १९ ॥ चतुर्थे
वकृताने षां भावाना यदि जायते ॥
पुंसो कार्याद् द्वयोभावाभीतल्वाघा
स्तु योषितां ॥ २० ॥ नपुंसके च ते मिश्रा
भवंति रघुनंदनः ॥ मात्रजं चास्यह
स्यं विषयाननभिकांक्षति ॥ २१ ॥ अ
तो मातुर्मनोभीष्टं कुर्यात् गर्भविवृ
द्धये ॥ सांच द्विहृदयां नारीमाहुर्दो
हदिनीं ततः ॥ २२ ॥ अदानाद्दोहदानां

स्तुर्गर्भस्थयंगतमादयः ॥ मातुर्यद्वि
षयालाभमलंतरात्मोजायतेसुतः ॥ २४ ॥
प्रवुद्धं पंचमेचित्तं मांसश्रोणितपुष्ट
ता ॥ षष्ठेस्थिःस्नायुनखरकेशलो
मविविक्तता ॥ २५ ॥ बलवर्णौ स्त्रीपुं
वितोसप्तमेत्वंगपूर्णता ॥ पादांत
रितहस्ताभ्यांश्रोत्ररंध्रेपिधायसः ॥
॥ २५ ॥ उद्विग्नोगर्भसंवासादास्तेग
र्भभयान्वितः ॥ आदिभूतप्रबोधो
सौगर्भदुःखादिसंयुतः ॥ २६ ॥ हा
कष्टमितिनिर्विण्णः स्वात्मानंशो
चयत्यथ । अनुभूतामयासर्वेष्वपु
मर्भक्षिदेहसकृत ॥ २७ ॥ कारंभवालु
कैलप्राप्याद्यस्यतासुखयाये ॥ जठ

श्रि·गी
॥ २६ ॥

ग्नमलसंतप्ताः पित्ताख्यारसविप्लुषः ॥
२९ ॥ गर्भाशये निमग्नं तु दंदह्यंति भृ
शं तु मां ॥ औदर्यः कृमिवक्त्रैश्च कोशि कू
टशाल्मलिकंटकैः ॥ ३० ॥ तुल्यानि च बहु
दंसातैं पार्श्वस्थैः श्लकचोदितं ॥ ग
र्भे दुर्गंधभूयिष्ठे जठराग्निप्रदीपि
ते ॥ ३१ ॥ दुःखं मयाप्तं यत्तस्मात्कनी
यः कुंभपाकजं ॥ पूयासृक्श्लेष्म
पायित्वं वांताशित्वं च यद्भवेत् ॥ ३२ ॥
अशुचौ कृमिभावश्च तत्प्राप्तं गर्भ
शायिना ॥ गर्भशय्यां समारुह्य
दुःखं यादृङ् मयापि तत् ॥ ३३ ॥ ना
तिशेते महद्दुःखं महाघोरं नरकेषु
यत् ॥ एवं स्मरन्मुहुः प्राप्तं नानाजी

श्रि

वस्थायातनाः ॥ २३ ॥ मोक्षोपायमभि
ध्यायन्वर्त्तते भ्यासतत्परः ॥ अष्टमे
त्वक्स्मृती स्यातां भोजस्तेजश्च हृद्भवं
॥ शुद्धमापीतरक्तं च निमित्तं जीव
नेमतं ॥ मातुरंतश्चलं गर्भस्थं बल
त्वं प्रधावति ॥ २५ ॥ ततो जातोऽष्टमे
मासि न जीवेत्सोऽजसोधिकः ॥ किं
चित्कालमसंस्थानं संस्कारास्पीड
तांगवत् ॥ २६ ॥ समयः प्रसवस्य
स्यान्मासेषु नवमादिषु ॥ मातुरं
स्रवहां नाडीमाश्रित्यानवतारितः ॥
नाल
२७ ॥ नाभिस्थनाडी गर्भस्य मात्राहा
रसावहा ॥ तेन जीवति गर्भोऽपि
मात्राहारेण पोषितः ॥ २८ ॥ अस्थि

विषम मास

प्रे.श्री
॥ ३८ ॥

यंत्रविनिष्पिष्टः पाचितः कुक्षिवर्त्मि
नः ॥ मेदोसृक्स्निग्धसर्वांगो जरायु
पुटसंवृतः ॥ ३९ ॥ निष्क्रामन्भृशदुः
खार्त्तो रुदन्नुच्चैरधोमुखः ॥ यंत्रा
दिवाविनिर्मुक्तः पतत्युत्तानशाप
धः ॥ ४० ॥ अकिंचित्करस्तदा लोको
मांसपेशीतयास्थितः ॥ श्वमार्ज्जा
रादिदंष्ट्रिभ्यो रक्ष्यते दण्डपाणि
भिः ॥ ४१ ॥ पितृवद्राक्षसं वेत्ति मातृ
वड्डाकिनीमपि ॥ पूयं पयोवदज्ञा
नाद्दीर्घकष्टं तु सेवते ॥ ४२ ॥ श्लेष्मणा
पिहितानाडी सुषुम्ना यावदेव हि ॥
व्यक्तवर्णं च वचनं तावद्वक्तुं न शक्य
ते ॥ ४३ ॥ अत एव च गर्भेपि रोदितं

नैवशोकयते॥ ततोथयौवनंप्राप्यम
न्मथज्वरविह्वलः॥५५॥ गायत्यकस्मा
त्तुवैस्तुतथाकस्माच्चवल्गति॥ आरो
हतितरूवेगाच्छांतानुद्वेजयत्यपि॥
५६॥ कामक्रोधमदांधस्मन्नकांश्चि
दपिवीक्षते॥ अस्थिमांसशिराला
यावामायामन्मथालये॥ ५६॥ उन्ना
नपृतिभराद्रक्तपारिनोदरसान्निभे॥
आसक्तःस्मरवाणार्तःआत्मन
दह्यतेभृशं॥५७॥ अस्थिमांसशि
रस्त्वग्भ्यः किमन्यद्दृश्यतेवपुः॥ वा
मानांमाययामूढोनकिंचीक्ष्यते
जगत्॥५८॥ निर्गतेप्राणपवनेदे
हंदृष्ट्वामृगीदृशाः॥ यथाहिताय

श्री·गी
॥ ३९ ॥

नैनैव वीक्षते पंचवर्षैर्दिनैः ॥ ४९ ॥ गृह
परिभवस्थानं जरां प्राप्यापि दुःखि
तः ॥ मोक्षमार्गापिदितारहोजंधम
नं न जीयते ॥ ५० ॥ सम्बद्धतो मदृद्धि
ः कटुतिक्तकषायभुक् ॥ वातभुग्नकं
टिग्रीवाकंठोरुचरणोबलः ॥ ५१ ॥ ग
दयुतासमाविष्टः परिभूतः स्वबंधुभिः ॥
भिः श्लेष्मलदिग्धांगो ग्लानिं गि
धनोत्सुकः ॥ ५२ ॥ ध्यायन्नसुखभाव
र्थान्केवलं वर्तते गृहे ॥ सर्वेन्द्रियवि
यालोपाज्जायते वालकैरपि ॥ ५३ ॥
ततो मृत्युजं दुःखमस्पष्टं तानोपल
भ्यते ॥ यस्माद्विभ्यति भूतानि प्रा
प्तापि परमां मतां ॥ ५४ ॥ जीयते स्म मुन
जंतुः परिष्वक्तोपि बंधुभिः ॥ सागर

त्रर्ल्लगतोगरुडेनेवपन्नगः॥५५॥हृ
कांतेक्वधनंपुत्राःक्रंदमानःसुहृज्जनं॥
मंडूकइवसर्पेणमृत्युनानीयतेपुनः॥
५६॥मर्मसूत्कृष्यमाणेषुमुच्यमानेषु
संधिषु॥यद्दुःखंम्रियमाणेनस्मर्यतां
मन्मुमुक्षुभिः॥५७॥दृष्टावाक्षिप्यमा
णायांसंज्ञयाह्रियमाणया॥मृत्यु
पाशैर्निबद्धस्यत्रातानैवोपलभ्यते॥
५८॥संरुध्यमानस्तमसामहच्चित्रमि
वाविशन्॥उपाहूतस्तथाज्ञातीन्वी
क्षतेज्ञानचक्षुषा॥५९॥अयःपाशेन
कालेनस्नेहपाशेनबंधुभिः॥आत्मा
नंकृष्यमाणंतंवीक्षतेपरितस्तदा॥
६०॥हिक्कयाबाध्यमानस्यश्वासेनप
रिशुष्यतः॥मृत्युनाकृष्यमाणस्यन

श्रि॰ गी॰
॥ ३९ ॥

स्वल्पवृत्तिपरायणं ॥ संसारयंत्रमारूढो
यमदूतैरधिष्ठितः ॥ क्व यास्यामीति दु
:खार्त्तैः कालपाशेन योजितः ॥ ६२ ॥
किं करोमि क्व गच्छामि किं गृह्णामि त्य
जामि किं ॥ इति कर्त्तव्यतामूढः कृच्छ्राद्दे
हमजन्मम न ॥ ६३ ॥ यातनापाशसं
बद्धो यमदूतैरधिष्ठितः ॥ इति गत्वानु
भवति याश्चास्ता यमयातनाः ॥ ६४ ॥
तासु यल्लभते दुःखं सहते मानवः कु
तः ॥ कर्पूरचंदनाद्यैस्तु लिप्यते सत
तं हि तन ॥ ६५ ॥ भूषणैर्भूष्यते चित्रैः
सुवस्त्रैः परिवार्यते ॥ अस्पृश्यं ज्ञायते
ते प्रेक्ष्यं जीवत्यक्तं न दा वपुः ॥ ६६ ॥ नि
ष्कासयंति निलयात्क्षणं न स्थाप्यं
स्यापि ॥ दह्यते च ततः काष्ठैस्तद्भस्म कि

यते क्षणान् ॥ ६७ ॥ भक्षितेवास्थिगाले न
गदूपूकुकरवायसैः ॥ पुनर्न देहपतेसो
पि जन्मकोटिशतैरपि ॥ ६८ ॥ मातापि
तागुरुजनः स्वजनो ममेति मायोप
मे जगति कस्य भवेत्प्रतिष्ठा ॥ एकोय
यावुजाति कर्मपुरः सरोयं विश्राम
वृक्षसदृशः खलु जीवलोकः ॥ ६९ ॥
सायं सायं वासवृक्षे समेताः प्रातः
प्रातस्तेन तेन प्रयांति ॥ त्यक्त्वान्यो
न्यं तं च वृक्षं विहंगा यद्वत्तद्वज्ज्ञात
योज्ञातयश्च ॥ ७० ॥ मरणे बीजं भवेज्ज
न्म जन्मबीजं भवेन्मृतिः ॥ घटीयंत्र
वदश्रांतो बंभ्रमीत्यनिशं नरः ॥ ७१ ॥
गर्भे पुंसः शुक्रपाताद्युक्तं मरणा

ॐ ऐं क्लीं सौः ६

शि॰गी
॥४०॥
शि

वधिः ॥ तदेतत्सुमहाव्याधेर्मेशाम्यस्मा
क्तिभेषजं ॥ ७४ ॥ इतिश्रीपद्मपुराणेशिव
गीतासूपनिषत्सुब्रह्मविद्यायांयोग
शास्त्रेशिवराघवसंवादेवैराग्ययोगोना
मासप्तमोध्यायः ॥ ७ ॥ श्रीभगवानुवा
च ॥ देहस्वरूपंवक्ष्यामिश्रृणुष्वावहि
तोनृप ॥ मत्तोहिजायतेविश्वंमय्येवं
मत्रधार्यते ॥ २ ॥ मय्येवेदमधिष्ठाने
लीयतेशुक्तिरूप्यवत् ॥ अहंतुनिर्म
लःपूर्णःसच्चिदानंदविग्रहः ॥ ३ ॥ अ
संगोनिरहंकारोशुद्धब्रह्मसनातनः ॥
अनाद्यविद्यायुक्तःसञ्जगत्कारण
तांव्रजे ॥ ४ ॥ अनिर्वाच्यामहाविद्या
त्रिगुणापरिणामिनी ॥ रजःसत्वं

ॐ ऐं ह्रीं सौं

तमश्चेतितद्गुणाः परिकीर्त्तिताः ॥४॥ सत्वं
सुखंसमादिष्टंसुखंज्ञानात्प्रदंनृणां ॥
दुःखास्पदं रजश्चवर्णं चंचलं च रजोमतं ॥५॥
तमः कृष्णं जडं प्रोक्तमुदासीनं सुखादि
षु ॥ अतो मम समायोगाच्छक्तिः सात्रिगु
णात्मिका ॥६॥ अधिष्ठाने तु मय्येव भ
जते विश्वरूपतां ॥ शुक्तौ रजतवद्रज्जौ
भुजंगो यद्वदेव तु ॥७॥ आकाशादीनि जा त्रा
यंते मत्तो भूतानि मायया ॥ तैरारब्धमि
दं सर्वं देहोयं पांचभौतिकः ॥८॥ पितृ
भ्यामशितादन्नात्षट्कोशं जायते वपुः ॥
स्नायवोस्थीनि मज्जा च जायते पितृ
तस्तथा ॥९॥ त्वङ्मांसं शोणितमिति
मातृतः संभवंति हि ॥ भावाः स्युः षड्वि

धास्तस्य मातृजाः पितृजास्तथा ॥१०॥ रा
जसाश्चात्मजाः सत्वसंभवा आत्मजास्त
था ॥ मृद्वः शोणितं मेदो मज्जा प्लीहा य
कृद्गुदं ॥११॥ हृन्नाभीत्येवमाद्यास्तु भा
वा मातृभवा मताः ॥ श्मश्रुलोमकचं स्ना
युशिराधमनयो नखाः ॥१२॥ दशनाः
शुक्रमित्यादि स्थिराः पितृसमुद्भवाः ॥
शरीरोपचितिर्वर्णो वृद्धिस्तृप्तिर्बलं स्थि
तिः ॥१३॥ अलोलुपत्वमुत्साह इत्यादीन्र
सजान्विदुः ॥ इच्छाद्वेषः सुखं दुःखं धर्मा
धर्मौ च भावना ॥१४॥ [illegible]
[illegible]णीत्येवमात्मजाः ॥ ज्ञानेंद्रि
याणि श्रवणं स्पर्शनं दर्शनं तथा ॥१५
रसनं घ्राणमित्याहुः पंच तेषां तु गो

સાત્વીકવાયુ [illegible]
રજસ સ્લેષ્મ
તમસ પિત:

चराः ॥ शब्दस्पर्शस्तथारूपंरसोगंधश्च
तिक्रमात् ॥१६॥ वाककरांघ्रिगुदोपस्थाना
कुः कर्मेंद्रियाणितु ॥ वचनादानगमन
विसर्गरतयः क्रमात् ॥१७॥ क्रियास्तेषां
मनोबुद्धिरहंकारस्त्वंतःपरं ॥ अंतःक
रणमित्याहुश्चित्तंचेतिचतुष्टयं ॥१८॥
सुखंदुःखंचविषयोविज्ञेयोमनसः
क्रिये ॥ स्मृतिभीतिविकल्पाद्याबुद्धेः
स्यान्निश्चयात्मिका ॥१९॥ अहंमम
अहंकारश्चित्तंचेतयतेयतः ॥ सत्वा
ख्यमंतःकरणंगुणभेदात्त्रिधामता
॥२०॥ सत्वंरजस्तमइतिगुणाःसत्वा
त्तुसात्विकाः ॥ आस्तिक्यशुद्धधर्मैक
मतिःप्रकृतयोमताः ॥२१॥ रजसोराज

[illegible] ॐ

शि·गी मायावाः कामक्रोधमदादयः निश्चल
४२ स्यप्रमादादिवंचनाशास्तु तामसाः २२
प्रसन्नेंद्रियतारोगपानालस्याद्यास्तु
सत्वजाः देहोमात्रात्मकस्तस्मादा
नेतद्गुणानिमान् २३ शब्दः श्रोत्रंमु
खरता वैचित्र्यं सूक्ष्मताधृतिः बलंच
गगनाद्वायोः स्पर्शश्च स्पर्शनेंद्रियं
२४ उत्क्षेपणमपक्षेपाकुंचनं गमनं
तथा प्रसारणमितीमानि पंचकर्मा
णिरूपसना २५ प्राणापानौ तथा
व्यानसमानोदानसंज्ञकान् नागं
कूर्मंच कृकरं देवदत्तं धनंजयः २६ द
शैतिवायुविकाराः तथा गृह्णाति लो
घवं तेषामुखनरः प्राणेनाभेः [illegible]

दधःस्थितः २४ वायसोनाम्नीकं
यानाभौहृदयपंकजे शायोश्वासरणमि
श्वासोच्छासादेरपिकारणं २५ अ
पानस्तुगुदेमेढ्रकटिजंघोदरेष्वपि
नाभिकंठमेहनयोरूरुजानुषु
तिष्ठति २६ प्राणापानधृतित्याग
ग्रहणाद्यस्यकर्मच समानोव्या
प्यनोऽखिलंशरीरंवह्निनासह २७
द्वासप्ततिसहस्रेषुनाडीरंध्रेषुसंच
रन् भुक्तपीतरसान्सम्यगानयन्देह
पुष्टिकृत् २८ उदानःपादयोरास्ते
हस्तयोरंगसंधिषु कर्मास्यदेहोन्न
यनोत्क्रमणादिप्रकीर्तितं २९ त्वगा
दिधातुनाश्रित्यपंचनागादयःस्थिता

त्रि॰ गी
॥४२॥

